# संस्कृतसाहित्ये सुरापानस्य प्रासङ्गिकता

डॉ. लक्ष्मीकान्तषडङ्गी

''धर्मार्थकामाः सममेव सेव्या यो ह्योकसक्तः स जनो जघन्यः''[1] इत्येवं सदुपदेशप्रदायकं संस्कृतसाहित्यं साम्प्रतिककालेऽपि न केवलं भारतवर्षस्यापि तु सम्पूर्णस्य विश्वस्य मार्गदर्शनस्य क्षमतां विभर्त्ति। अतः सर्वेषां प्राच्यपाश्चात्यभाषाविदामिदं निश्चिन्तं मतमास्ति यत्, नास्ति विश्वस्य किमपि भाषासाहित्यं यत्र प्रभावः संस्कृतसाहित्यस्य न स्यात्। भारतीयानां तु सर्वासामेव भाषासाहित्यानामुद्गमस्थलं संस्कृतसाहित्यं वर्तत एव। अत्रैव साहित्यदर्शनादिभ्यः आरभ्य आयुर्वेदार्थशास्त्रेषु, धर्मशास्त्रेषु, ज्योतिर्विज्ञानविषयेषु प्रस्थानेषु अपि विरचिताः ग्रन्थाः संस्कृतवाङ्मयस्य सर्वात्मकत्वम् उद्धोषयन्ति। अत्रापि मानवानां दैनन्दिनजीवनस्य खाद्य-पानीय-वास-कृत्याकृत्यादिकं शृङ्खलं विधिनिषेधमाध्यमेन वर्णितमस्ति। परन्तु सत्स्वपि शास्त्रेषु एवंविधखाद्यशृङ्खलेषु सम्प्रति एकविंशशतकस्य मानवाः स्वखाद्यपानीयादिषु विषयेषु नैव पूर्णसंशयविमुक्ताः। इदानीम् अपि केचन जनाः केषुचित् विषयेषु अज्ञाः सन्ति। अतः तान् तान् विषयान् प्रति तेषां मनोभावना काचित् भिन्ना एव वरीवर्त्ति। अस्यैव मूलकारणमस्ति यत् जनाः शङ्काकुलिताः सन्तः स्वस्य आहारविहारादिषु प्रवृत्तिं निवृत्तिं च ज्ञातुमसमर्थाः। एतदर्थं यथार्थेनप्राचीनभारतीयार्षविज्ञाने प्रतिपादितमस्ति यत्-

''शङ्काभिः सर्वमाक्रान्तमन्नं पानञ्च भूतले।
प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा॥''[2] इति।

जगत्यस्मिन् सचराचरजीवानां प्राणधारणाय विधिना जगतः सर्वमेव पदार्थम् अन्नरूपेण भोज्यमिति विनिश्चितम्। अतः जीवानां प्राणधारणाय स्थावरं जङ्गमञ्च सर्वमेव भोजनमस्ति। मनुसंहितायाम्





एतदर्थमुच्यते-

''प्राणस्यान्नमिदं सर्वं प्रजापतिरकल्पयत्।
स्थावरं जङ्गमञ्चैव सर्वं प्राणस्य भोजनम्॥''[3] इति।

एवं विधात्रा प्रागेव विनिश्चितेऽपि सम्प्रति विशेषतः जनाः सर्वत्रैव सर्वदा स्वकीयाहारादिषु शङ्काकुलिताः सन्तः जीवन्ति। जनाः आत्मनः कृते किं भोज्यं किमभोज्यम्, भोज्यं चेत् कथं भोज्यं कदा वा भोज्यम् इत्येवं व्यवहारज्ञानशून्याः जायन्ते। अतः सम्प्रति प्रत्यहमेव समाजे खाद्यपानीयजनितविषक्रियया जनानाम् अकालवियोगः दरीदृश्यते। एतादृशेषु संशयपूर्णखाद्यपदार्थेषु जनानां 'सुरा' अस्ति अन्यतमा। यस्याः पर्यायवाचकशब्दाः सन्ति मदिरा, मद्यं, मधु, कादम्बरी च इत्यादयः। एतेषु पर्यायवाचकशब्देषु 'मद्यम्' इति शब्दस्य व्युत्पत्तिः 'मद्' इति धातोः करणे 'य' इति प्रत्यये जायते। यस्यार्थः भवति सुरा। संस्कृतसाहित्यवाङ्मये सुरापानस्य बहुविचित्रवर्णनं नैव दुर्लक्ष्यम्। वैदिकवाङ्मयादारभ्य अस्यैव व्यवहारस्य सूचना अस्माभिः समधिगता। परन्तु एकविंशशताब्द्याम् आविर्भूताः इदानीन्तनजनाः सुरापानस्य यथार्थव्यवहारं नैव जानन्ति। अस्मादेव इदानीम् अपि केचन जनाः सुरापानं पापमिव मन्यन्ते केचन च यादृशीकं यथेष्टमेव सेवन्ते। केचित्तु अस्याः वशीभूताः सन्तः प्रतिदिनं परिवारे समाजे च अशान्तिं सृजन्ति। पुनश्च केचन असामाजिकाः विवेकहीनाश्च अस्याः अतिसेवनेनैव मृताः दरिद्राश्च भवन्ति। एतेषां कारणं तु सुरायाः दुरुपयोगः भवेत्। जनाः सुरापानस्य यथार्थरीतिं न ज्ञात्वा येथच्छं व्यवहृत्य विपद्ग्रस्ताः भवन्ति। एतदर्थं यथार्थेनोच्यते शास्त्रेषु-

''किन्तु मद्यं स्वभावेन यथैवान्नं तथा स्मृतम्।
अयुक्तियुक्तं रोगाय, युक्तियुक्तं यथाऽमृतम्॥'' इति।

अस्यैव पद्यस्य आंलोभाषायाः अनुवादः यथा- 'but alcohol by nature is like food (in composition and giving energy). When used inappropriately is for getting disease, when used

appropriately is like nectar.'

एवं सत्यपि सुरापानस्य प्रासङ्गिकत्वेप्रसङ्गेऽस्मिन् बहुशो वैमत्यमपि वरीवर्त्ति संस्कृतसाहित्ये। भगवता मनुना सुरापानं महापातकम् इति प्रतिपादयति। तोनोक्तम्–

''ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥''[५]

न केवलमेतत् अपि तु सुरापानं कामजव्यसनेषु अन्यत्तम इति मनोः मतमस्ति। तद्यथा–

''मृगयाक्षो दिवास्वप्नः परिवाद स्त्रियो मदः।
तौर्यत्रिकं वृथाद्या च कामजो दशको गणः॥''[६] इति।

एवञ्च विद्याविस्मरणम्, वेदनिन्दा, कौटसाक्ष्यम्, मित्रहत्या, अभक्ष्यभक्षणम्, अनाद्यभक्षणञ्च सुरापानतुल्यमस्ति इति मनोः मतमस्ति। तद्यथा–

''ब्रह्मोझ्ता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः।
गर्हितानाद्ययोर्जग्धि सुरापानसमानि षट्॥''[७] इति।

पुश्च 'सुरा' भवति मलस्वरूपम्, मलशब्देन च पापमुच्यते। अतः शूद्रं विना ब्राह्मणक्षत्रियवैश्यानां सुरापानम् अयुक्तियुक्तमस्ति। एतत् सुरापानं तु यक्ष–रक्ष–पिशाचादीनां घृण्यजीवानां पेयमस्ति न तु ब्राह्मणादीनाम्। अतः सुरापानस्य निन्दाप्रसङ्गे मनुना सविस्तरं वर्णयन्नाह–

''सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
तस्मात् ब्राह्मणराजनौ वैश्यश्च न सुरां पिवेत्॥[८]
गौडी पैष्टी च साध्वी च विज्ञेया त्रिविधा सुरा।
यथैवेको तथा सर्वा न पातव्या द्विजोत्तमैः॥[९]
यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम्।
तद् ब्राह्मणेन नात्तव्यं देवानामश्नता हविः॥[१०]
अमेध्ये वा पतेन्मत्तो वैदिकं वाप्युदाहरेत्।





अकार्यमन्यत् कुर्याद्वा ब्राह्मणे मदमोहितः॥[११]
यस्य कार्यगतं ब्रह्म मद्येनाप्लाव्यते सकृत्।
तस्य व्यपैति ब्राह्मण्यं शूद्रत्वञ्च स गच्छति॥[१२]
सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिवेत्।
तया स्वकाये निर्दग्धे मुच्यते किल्विषात्ततः॥''[१३] इति।

शास्त्रान्तरेष्वपि मद्यमांसभक्षणशीलः जनः 'विनाशशील' इत्युक्त्ग तस्यैव निन्दा बहुशो विहिता। तद्यथा–

''भिक्षो! मांसनिषेवणं प्रकुरुसे किं तेन मद्यं विना।
मद्यञ्चापि तव प्रियं प्रियमहो वारङ्गनाभिः सह।
तासामर्थरुचिर्कुतस्तव धनं द्युतेन चौर्य्येण वा।
चौर्य्यं द्युतापरिग्रहोऽपि भवतः नष्टस्य काऽन्या गतिः॥''[१४] इति।

एवञ्च सुरापानोन्मत्तः जनः स्वकृतकर्म एव विस्मरति। अभिज्ञानशाकुन्तलाख्ये नाटके महाकवि–कालिदासः विस्मरणशीलस्य जनस्य चरित्रं दुर्वासामुखेन 'प्रमत्तजन' इति कथयति। तद्यथा–दुर्वाससः शापप्रसङ्गे–

''स्मरिष्यति त्वां न स बोधितोऽपि सन्।
कथां प्रमत्तः प्रथमं कृतामिव॥''[१५] इति।

एवं संस्कृतसाहित्यवाङ्मयस्य विहङ्गावलोकनेन परिज्ञायते यत् सुरापानस्य बहुशो निन्दाऽपि परिलक्षिता।

परन्तु एवं सत्यपि सुरापानस्य बहुधा विसंवादे संस्कृतवाङ्मये अस्यैव प्रासङ्गिकता वैदिककालादेव ऋषिभिरुद्घोषिता अस्ति। सम्भवतः श्रमक्लान्तिदुःखकष्टादिनिवारणार्थं तात्क्षणिकानन्दलाभार्थं च मादकासक्तिः सुप्राचीनकालादेव देवलोकेष्वपि सञ्जातः। ऋग्वेदस्य नवमे मण्डले प्रतिसूक्तेषु एव पवमानः सोमः स्तुयते। सोमयागस्य असामान्यप्राधान्यादेव सोमस्तुतिः पृथक् भावेन वर्जिता इति मन्यते। तत्र सोम–इन्द्रं प्रति प्रवहमानां सोमरसधारां दुग्धस्त्रविणीधेनुना सह तुलना क्रियते। तद्यथा–''प्रदेवमच्छा मधुमन्त इन्दरोऽसिष्यदन्त गाव

आ न धेनवः''[१६] इति। एवञ्च सोमरसपानात्। इन्द्रस्य शक्तिलाभविषयोऽपि अत्र वर्णितोऽस्ति। तद्यथा–

शर्षणावति सोममिन्द्रः पिवतु वृत्रहा।
बलं दधान आत्मनि करिष्यन्
वीर्यं महदिन्द्रायोन्दो परिस्रव॥[१७] इति।

वैदिकवाङ्मयात् परं लौकिकसंस्कृतसाहित्ये सुरापानस्य प्रासङ्गिकताप्रसङ्गवर्णनं महाकविकालिदासादेव परिलक्ष्यते। तस्य चर्चा परवर्त्तिनि काले करिष्यामः। इत्यलं पल्लवितेन।

**पादटीका** –

१. महाभारतम्–शान्तिपर्व–३.३५, पृ. ३०५
२. हितोपदेशः १–७१, पृ. ७५
३. मनुसंहिता–५.२८, पृ. ३६२
४. F.b.http/blog.practicalsanskrit.com
५. मनुसंहिता. ११.५५. प. ८८०
६. तत्रैव, ७.४७, पृ. ४५८
७. तत्रैव, ११.५७, पृ. ८८१
८. तत्रैव, ११.९४, पृ. ८९६
९. तत्रैव, ११.९५, पृ. ८९६
१०. तत्रैव, ११.९६, पृ. ८९७
११. तत्रैव, ११.९७, पृ. ८९७
१२. तत्रैव, ११.९८, पृ. ८९८
१३. तत्रैव, ११.९१, पृ. ८९४
१४. काव्यदीपिका १.२५, पृ. २०
१५. अभिज्ञानशाकुन्तलम् ४.१, पृ. २५४
१६. ऋग्वेदः ९.३, पृ. ७५
१७. तत्रैव, ९.५, पृ. ७५

**सहायकग्रन्थसूची** –

१. अभिज्ञानशाकुन्तलम्, ड. अनिलचन्द्रवसुः, संस्कृतवुक् डिपो–कलिकाता
२. काव्यदीपिका साम्बिदीप्रकाशनम्–पुरी–ओडिशा
३. कादम्बरी यदुपतित्रिपाठी, वि.एन्. पब्लिकेशन, श्यामाचरणदेस्त्रीट्, कलिकाता
४. वैदिकसाहित्येर इतिहास ड. प्रद्योत्कुमारवन्द्योपाध्याय, दि ढाका ष्टुडेण्टस् लाइब्रेरी
५. मनुसंहिता, मानवेन्दुवन्द्योपाध्याय, संस्कृतपुस्तकभाण्डार–विधानसरणी





# भरतमुनिदिशा नाट्यमण्डपविमर्शः

ड.बुद्धेश्वरषडङ्गी

(keywords : विकृष्टः, चतुरस्रः, त्र्यस्र, दण्ड, भूमिः, नक्षत्रम्)

भरतमुनिप्रणीतं नाट्यशास्त्रं काव्यमार्गे उपनिषत्तुल्यं भवति। तत्र प्रोक्तेषु नाट्यतत्त्वेषु नाट्यमण्डपविमर्शः स्वतन्त्रस्थानमावहति। तत्र मण्डपविषये द्वितीयध्याये पर्यालोचनं कृतम्। तस्य संक्षिप्तविन्यासः अत्र उपस्थाप्यते। भरतेन उक्तं यथा–

''दिव्यानां मानसी सृष्टिर्गृहेषूपवनेषु च।
नराणां यत्नतः कार्या लक्षणाभिहिताः क्रियाः।।'' ना.शा. २/५
(यथा भावाभिनिर्वर्त्त्याः सर्वे भावास्तु मानुषाः)

अर्थात्, देवतानां गृहेषु उपवनेषु च निर्माणं क्रियते, तत्तु मानसं निर्माणं भवति। मानसं निर्माणं सामान्यचक्षुषा द्रष्टुं न शक्यते शास्त्रादिनियमाश्च तत्र नापेक्षन्ते। किन्तु मानवानां निर्माणं सर्वप्राणिदृश्यं भवति। तस्माच्छास्त्रप्रमाणमनुनिर्माणं श्रेयस्करं भवेत्। अतः मुनिना भरतेन नाट्यमण्डपस्य वास्तुविषये पूजनविषये च पर्यालोचि–

इह प्रेक्षागृहं दृष्ट्वं धीमता विश्वकर्मणा।
त्रिविधः सन्निवेशश्च शास्त्रतः परिकल्पितः॥ ना.शा.२/७

नाट्यप्रयोगसौकर्याय नाट्यमण्डपस्य आकारस्त्रिविधो भवेदिति धीमान् विश्वकर्मा स्थिरीचकार। शास्त्रानुकूलस्यास्य नाट्यमण्डपस्य भेदाः मूलतः त्रिधा। यथा–

**२. त्रिविधनाट्यमण्डपस्य परिचयः**

| | | |
|---|---|---|
| विकृष्टः | चतुरश्रः | त्र्यश्रः |
| आयत्ताकारः | वर्गाकारः | त्रिकोणाकारः |
| ज्येष्ठः | मध्यमः | अधमः |
| देवतानां कृते | नृपाणां कृते | सामान्यप्रजानां कृते |

(त्रि+अस्रम्/अश्रः त्र्यस्रम्–त्रिकोणात्मकम्। त्र्यश्रः–त्रिकोणात्मकः
चतुर्+अस्रम्/अश्रः। चतुरस्रम्–चतुष्कोणात्मकम्। चतुरश्रः–चतुष्कोणात्मकः।)

## २.१. त्रिविधमण्डपस्य चित्राणि




एतदेवोक्तं भरतमुनिना–

विकृष्टश्चतुरश्रश्च त्र्यश्रश्चैव तु मण्डपः
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथावरम्।
प्रमाणमेषां निर्दिष्टं हस्तदण्डसमाश्रयम्।
शतं चाष्टौ चतुःषष्टिर्हस्ता द्वात्रिंशदेव च॥
अष्टाधिकं शतं ज्येष्ठं चतुःषष्टिस्तु मध्यमम्।
कनीयस्तु तथा वेश्म हस्ता द्वात्रिंशदेव तु॥
देवानां तु भवेज्ज्येष्ठं नृपाणां मध्यमं भवेत्।
शेषाणां प्रकृतीनां तु कनीयः संविधीयते॥

देवनृपमानवानां कृते निर्मितानां नाट्यमण्डपानां हस्तप्रमाणानुसारेण नवभेदाः, दण्डप्रमाणानुसारेण च नवभेदाः अभिनवभारत्यां टीकाकारेणाभिनवगुप्तेन स्वीकृताः। ते भेदाः यथा–

**हस्तप्रमाणेन नाट्यमण्डपस्य नवभेदाः**








दण्डप्रमाणेन नाट्यमण्डपस्य नवभेदाः




## ३. मापपरिचयः

मण्डपनिर्माणाय मापस्य नितरामावश्यकता विद्यते। मापविषये सूक्ष्मातिसूक्ष्मविवेचनचिकीर्षुणा मुनिना प्रमाणस्य नव भेदाः कल्पिताः यथा–

१. अणू, २. रजः, ३. बालः, ४. लिक्षा, ५. यूका, ६. यवः, ७. अङ्गुलम्, ८. हस्तः, ९. दण्डः।

तत्र अष्टौ अणवः एकं रजः, अष्ट रजांसि एको बालः, अष्टौ बालाः एका लिक्षा, अष्टौ लिक्षाः एका यूका, अष्टौ यूका एको यवः, अष्टौ यवाः एकमङ्गुलम्, चतुर्विंशति अङ्गुलानि एकहस्तः, चत्वारो हस्ताः एकः दण्डः।

अनेनैव परिमापेन विकृष्ट–चतुरश्र–त्र्यश्रमण्डपानां दैर्घ्यप्रस्थादिकं निरूप्यते।

## ४. चतुरश्रमण्डपस्य श्रेष्ठता

त्रिषु नाट्यमण्डपेषु मध्यमः नृपोपयोगिनाट्यमण्डपः सर्वोत्तमः इति भरतेन आह। विप्रकृष्टाख्यः विशालनाट्यमण्डपः देवोपयोगी न तु मानवोपयोगी। यतः तत्र प्रेक्षणीयस्य सुखं श्राव्यं न सम्भवेत्। अतः चतुरश्राख्यो नाट्यमण्डपः मर्त्यलोके विधातव्यः।

चतुरश्रनाट्यमण्डपस्य दैर्घ्यं चतुःषष्टिकरात्मकम्। प्रस्थं च द्वात्रिंशत्करात्मकं भवेत्। अतः ऊर्ध्वं कर्त्तुं भरतः वारयति यतः तेन नाट्यम् अव्यक्तभावं व्रजेत्। उक्तं यथा-

अत ऊर्ध्वं न कर्त्तव्यः कर्त्तृभिर्नाट्यमण्डपः।
यस्मादव्यक्तभावं हि तत्र नाट्यं व्रजेदिति॥ ना.शा. २/१८

## ५. नरलोके विकृष्टनाट्यमण्डपनिर्माणे समस्या

विकृष्टाख्यनाट्यमण्डपः देवानां कृते भरतेन कल्पिता। यतः देवतानां सृष्टिः मानसी भवति। अतएव वस्तुगत्या तस्याः कल्पनं मनसि एव न तु प्रत्यक्षतया तस्य निर्माणं सम्भवम्। विकृष्टाख्ये देवतापयोगिनाट्यमण्डपे उच्चैः उच्चार्यमाणं पाठ्यं भृशं विस्वरत्वं व्रजेत्। विशालमण्डपे ध्वनेः अनिःसरणात् परवर्तिशब्दस्य वर्णस्य वा श्रवणं सम्यक् न स्यात्। अभिनवगुप्तोऽपि विकृष्टमण्डपे शब्दान्तरस्य प्रसाराभावात् विस्वरत्वं सम्भवेदिति टीकायां लिखति। विकृष्टमण्डपे अपरोऽपि दोषः भरतेन आविष्कृतो यथा- विशालनाट्यवेश्मनि नटानां मुखगतभावाः पृष्ठतः दर्शकाः सम्यक्तया द्रष्टुं न शक्नुवन्ति। तेन मुखभावात् व्यज्यमानस्य रसस्य अनुभावव्याभिचारिभावादयः अस्पष्टतां व्रजन्ति। रसानन्दानुभवे व्याघातरूपेण मुखभावानां सम्यगदर्शनाद् रसास्वादः असम्भवः। काव्यात्मनः मुख्यफलस्य रसस्य प्रकाशे विघ्नोत्पादनकारिविशालमण्डपः सर्वदा परित्येजेदिति भरतस्य मतम्। अतो विकृष्टाख्यो नाट्यमण्डपः कदापि लोके न चिन्तनीयः।

नरलोके कदापि विकृष्टाख्यं दीर्घं नाट्यमण्डपं न कुर्यात्। यतः तत्र पाठ्यं गेयं च सुखश्राव्ये न भवेताम्। देवतानां गृहोपवनेषु मानसी सृष्टिर्भवति अतः सा सृष्टिः दृश्या न भवति। किन्तु नराणां सर्वेभावाः गृहादिपदार्थाश्च दृश्याः सन्ति। मानवानां सर्वे भावा यत्नभावाभिनिष्पन्नाः इति भरतेन आह-

देवानां मानसी सृष्टिर्गृहेषूपवनेषु च।
यत्नभावाभिनिष्पन्नाः सर्वे भावाः हि मानुषाः॥ ना.शा.२/२२





अतो मानवो देवोपयोगिनाट्यमण्डपाय स्पर्धां न कुर्यात्।

### ५.१ नाट्यमण्डपस्य भूमिलक्षणम्

नाट्यमण्डपनिर्माणमिच्छता जनेन सर्वदा भूमिविभागः परीक्षणीयः। गृहोपयोगिभूमिः यदि प्राप्यते तर्हिस्तत्र वास्तुप्रमाणेन नाट्यगृहस्य निर्माणं कर्त्तव्यम्। तदर्थं कीदृशी भूमि उपयोगिनीति मुनिना आह-

समा स्थिरा तु कठिना कृष्णा गौरी च या भवेत्।
भूमिस्तत्रैव कर्त्तव्यः कर्त्तृभिर्नाट्यमण्डपः॥ २/२५

अर्थात् या भूमिः स्थिरा तथा समतलविशिष्टा सा एव उत्कृष्टा भवतीति मुनेर्मतम्। अत्र स्थिरेति पदेन वन्यावात्यादिभिः या कदापि न अवक्षीयते तादृशी भूमिः प्रशस्तेति चिन्त्यम्। नाट्योपयोगिनी भूमिः वर्णेन गौरी अथवा कृष्णा भवेत्।

आदौ नाट्योपयोगिन्याः भूमेः परिष्कृतिं विधाय लाङ्गलेन समुत्कर्षणं कर्त्तव्यम्। कर्षणानन्तरं तस्याः अस्थि, कीलकं, कपालादिकं च निष्काषनीयम्। अपि च तृणगुल्मादयः परिष्कर्त्तव्याः। अनेनैव प्रकारेण शुद्धायां भूमौ नाट्यमण्डपनिर्माणं मङ्गलकरं भवति।

### ५.२ नाट्यगृहारम्भोपयोगिनक्षत्राणि

नाट्योपयोगिनक्षत्रविषये भरतस्य मतं यथा-

त्रीण्युत्तराणि सौम्यं च विशाखापि च रेवती।
हस्ततिष्यानुराधाश्च प्रशस्ता नाट्यकर्मणि॥ (प्रक्षिप्तश्लोकः)

वसुमतीशोधनं विधाय पुण्यनक्षत्रयोगेन गृहनिर्माणार्थं शुक्लं सूत्रं प्रसारयेत्। तत्र पुण्यनक्षत्राणि यथा- उत्तराषाढा, उत्तराफाल्गुनी, उत्तराभाद्रपदा, मृगशिरा, विशाखा, रेवती, हस्ता, पुष्या तथा अनुराधा। अत्र श्लोके त्रीण्युत्तराणि पदेन उत्तरपदयुक्तानि त्रीणि नक्षत्राणि इति अवगन्तव्यम्। यथा- उत्तराषाढा, उत्तराफाल्गुनी, उत्तरभाद्रपदा।

——

परिशीलितग्रन्थाः

१. द्विवेदीपारशनाथः– नाट्यशास्त्रम्, सम्पूर्णानन्दप्रकाशनम्–१९९२

२. रेस्तोगी सुधा– हिन्दीनाट्यशास्त्रम्, कृष्णदासअकादमी प्रकाशित १९८९

३. त्रिपाठिराधावल्लभः, नाट्यशास्त्रविश्वकोशः, निउभारतीयवुककर्पोरेशन, नई दिल्ली–२०१२

४. etext : www.sanskritdocuments.org/natyashastram

५. शतपथिहरेकृष्णः, साहित्यत्रयी, राष्ट्रियसंस्कृतविद्यापीठप्रकाशनम्, तिरुपतिः, २०१०





# अर्वाचीनसंस्कृतकाव्यधारा–एका समीक्षा

■उली वर्मन्

काव्यं लोकचरितस्य प्रतिविम्वस्वरूपम् । कविः स्वसमाजस्य यच्चित्रं पश्यति तस्येव चित्रस्य शब्दार्थमयकलेवरं भवति काव्यम् । तत्र अरुचिविषयजालं प्रति उपेक्षाभावः लोककल्याणकरविषयजालं प्रति सम्मानमानं च कविना क्रियते । अतः अर्वाचीन-संस्कृतशास्त्रविदा राधावल्लभत्रिपाठिमहोदयेन काव्यस्य सामान्यलक्षणं लोकचरितस्य कीर्तनमिति उक्तम् ।[1]तत्रापि त्रिविधस्य लोकस्य वितारः तेन कृतः[2]। एतादृशस्य लोकत्रयस्य अनुकीर्तनम् अर्थात् पुनराविष्करणं काव्ये क्रियते ।स्वयमेव अनुकीर्तनं पदस्य व्याख्यानं सूत्रवृत्यौ करोति यथा- शब्दाश्च भवति सार्थाः इत्थमनु कीर्तनमिति पदेन निर्दुष्टयोः,सगुणयोः,सालङ्कातयोः रसाभिव्यञ्जकयोश्च शब्दार्थयोः संग्रह[3] । अत्र त्रिपाठिमहोदयानां लक्षणात् प्राचीनमार्गातनुरोधेन समसामयिक सामाजिकस्थितिवर्णनमेव काव्यमिति अभिव्यज्यते । अनुकीर्तनस्यापि चातुर्विद्धम् तेन स्वीकृतम्[4] ।तेन अलङ्कारमार्गेन अलङ्कृतिः कविकृतिः पूर्णतामीयात् इति आचार्यानाम् दृढोक्तिः । अर्वाचीन कविषु प्रमुखं स्थानमलङ्कुर्वता कविसहृदयमुर्तिरूपस्य पद्मश्रीविरुदभाजः

---

[1] लोकानुकीर्तनं काव्यम् – स च लोक त्रिविधः-अभिनवकाव्यालङ्कारे 1/1/1

[2] अनुषक्ततत्त्वं चैतेषां त्रयानामपि चरितानाम् आदि भौतिक,आदि दैविक आध्यात्मिकश्च – अभिनवकाव्यालङ्कारे 1/1/2-4

[3] अभिनवकाव्यालङ्कारसूत्रे प्रथमाध्याय-

[4] अनुकीर्तनं चतुर्विधम् । तेनास्य पूर्णता ।पूर्णता चालङ्कारः । तेन अलङ्कार एव काव्यम् ।1/1/7-10